Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 6 | ISSN : 2581- 6306

# ज्योतिषशास्त्रे राजयोगविमर्शः



**डॉ० धर्मानन्दठाकुरः**
**ग्रा० + पो० - सरिसब–पाही, थाना-पण्डौल,**
**जिला - मधुबनी, बिहार (भारत)**

**सारांशः** - ज्योतिषे लोककल्याणाय विविधाः भोगाः विचरिताः सन्ति। तत्र राजयोगस्य स्थानं न्यूनतमं विद्यते। सर्वे जातकाः राजयोगं वाञ्छन्ति। राजयोगकारकग्राह्वाः अनुकूलाः भवन्ति चेत् मानवाः राजयोगयुक्ताः भवन्ति। राजयोगकराः जनाः सर्वत्र सुप्रतिष्ठिताः भवन्ति।

**प्रमुख शब्दाः** - राजयोगाः, चक्रवर्तीयोगः, राजभगयोगः, नक्षत्राश्रितः, दशविचारः, कर्मेशः, प्रतापी इत्यादयः सन्ति।

---

तत्र ज्योतिषशास्त्रे बहुविधाः योगाः भवन्ति। सामान्यराजयोगः, महाराजयोगः, महाराजाराजयोगः, चक्रवर्तीयोगः, राजसदृशयोगः, राज्यकुलोद्भवराजयोगः प्रभृतयः अनेके प्रकारः राजयोगः काः भवति। काः तद्यथा–

**वेर्गोनमगते लग्ने चन्द्र वा चन्द्रवर्जितैः।**

**वतुराद्या ग्रहैदृष्टे नृपा द्वाविंशतिः स्मृताः॥**[1]

**नीचस्थितो जन्मनि यो ग्रहः स्याद् यद्राशिनाथपि तदुच्चनाथ।**

**स चन्द्रलग्नाद्यदि केन्वर्ती राजा भवेद्धार्मिकचक्रर्ती॥**[2]

राजयोगेणापि बहवः प्रकाराः सन्त्यत्र, यथासमान्यराजयोगः, राजपुत्रस्य राजयोगः, चक्रवर्तीराजयोगः आदयः। ग्रहबलाबलप्रभावेण उपराजा, मन्त्रिगणसदृशाः योगादयोऽपि इत एवोत्पद्यन्ते।

सामान्यरूपेणाऽयं योगः उच्चग्रहवशादेव उत्पात्तिकः परिलक्ष्यते न हि सामान्यग्रहयोगवशात्। ये चात्र राजयोगाः उपवर्णिता, तेषु नूनम् उच्चग्रहाणां भूमिका अतीवमहत्त्वपूर्णा वर्तते परन्त्वत्र कुत्रचिद् उच्चग्रहे सति दरियागप्रभृतयः अनेके रेकायोगाः प्रत्यक्षीक्रियन्ते। अत्रेकं कारणं यत् राजयोगसदृशयोगानां विचारप्रसंगे लग्नेशस्य स्थितिज्ञानं परमावश्यकं भवति, अन्यथा तदभावे हि भावानां सर्वाभावः शरीरिणाम्। अतोऽत्र लग्नेशस्य प्राबल्यम् उनफलप्राप्त्यर्थ परमावश्यकमनुभूय आचार्यैः योगानां निर्माणे लग्नेशस्य विचारः कृतवन्तः।

पञ्चमहापुरुषप्रभृतयः योगाः अपि राजयोगसदृशाः। अत एव बहवः मानवकर्मयोगा अपि राजयोगसदृशाः परन्तु योगेऽस्मिन् समुत्पन्नः जातकः प्रभुत्वमानसम्पनि प्राप्नोति परन्तु नेतृत्वप्रभृतियोग्यतां न कार्यते, यावत् ग्रहयोगेन सह गुरोः, शनेः शुव्रस्य च सम्बन्धाः न प्राप्यन्ते।

**राजभङ्गयोगः –**

येन ग्रहयोगेन केनापि प्रकारेण पूर्वोक्त–राजयोग–कारकयोगानां भंगः जायत स राजभंगयोगः कथ्यते। तत्र फलाभावः, प्राप्यते, यतो हि तत्रस्था योगनिर्माणप्रव्यिा अपूर्णा भवति। भंगस्य निर्माणं तदैव भवति तदा कोऽपि योगकारकतन्त्रस्य न्यूनता जायते अथवा प्रमाणकारकग्रहस्याभावः दृश्यते। यथा–

**मेषे जूनवांशके दिनकरे पापेक्षिते निर्माणः।**

**कन्यारशिगते यदा भृगुसुते कन्यांशके भिक्षुकः।**

**नीचर्खे त्वतिनीचभागसहिते जाते दिवानायके।**

**राजश्रेष्ठकुलाग्रजोऽपि विगतस्त्रीपुत्रदर्शनः।।**[3]

अन्यञ्च

**चरावसासने शशिनि स्थिरादौ द्विदेहममये बलवर्जिते च।**

**हीने विलग्ने यदि खेचरेर्विनाशमेति क्षितिपालयोगात्।।**

तत्र राजयोगनिर्माणपूर्वमेव राजभंगयोगस्य निर्माणं विशेषण महन्वावह इति। यतो हि यदि भंगकारकस्थितौ जातकस्य राजयोगः दैवज्ञैः निर्मीयते तार्हि तस्य जीवने राजयोगस्याभावः भवत्येव परन्त्वत्र दैवज्ञानां वाणी विफला न भवेदिति मत्वा तस्याः संरक्षणार्थ भंगज्ञानमतीव महत्त्वपूर्णं भवतीति। अपशकुनेनाऽपि संहिताशास्त्रोक्तदृष्ट्या राजभंगस्योल्लेखः प्राप्यते। तद्यथा–

**उल्कायाः पतने चैव निर्घातव्यतिपातयोः।**

**केतोश्च दर्शने चैव यान्ति नाशं नृपोद्भवा।।**

**अन्यैः व्यूत्पातैस्त्रिश्याकुतारा यदोदयं यान्ति।**

**सद्यः प्रयान्ति विलयं नृपयोगा भानुजौ यदि विलग्ने।।**[4]

एवं ग्रहयोगामाधारेण, राश्यामाधारेण भावामाधारेण च निर्मिताः बहवः योगाः भंगरेकाप्रभृतयः सन्ति, येषां निर्माणं परमावश्यकं भवतीति।

**राजयोगनिर्माणकाल:**

शास्त्रोक्तराजयोगस्योपलब्धि: कदा भविष्यती निर्माणं दशमामयमेनैव प्रतिपादितं वर्तते। ग्रहाणां दशाविचार: एव भिन्नभिन्नग्रहभावादिसम्बन्धेन शुभाशुभविश्लेषण प्रस्तौति। तत्रोक्ता प्रतिव्या यद्यपि भिन्न वर्तते परन्तु दशासु अन्यतमा विशोत्तरीदशा नक्षत्राश्रिता युक्तियुक्ता प्रामाणिकी चोपलभ्यते यया सर्वमपि कालनिर्माणं कतुण्व शक्यते। तत्र वराहमिहिरेण प्रोक्तं बृहज्जातके यत्–

**कर्मलग्नयुतापाकदशायां राज्यलब्धिरथवा प्रबलस्य।**

**शत्रु-नीचग्रहजातदशायां छिसंश्रयदशा परिकल्पया:।।**[5]

अत्रोक्तं यत् राजयोगकर्तृणा ग्रहाणां मध्ये यो ग्रह: लग्नयुतो तत्सम्बन्धिमानीदशायां राजलक्ष्मि: भवति। अथ लग्नदशमयो: द्वयोरपि ग्रहौ भवत:, तदा तयोर्ममये बलवान् ग्रहस्य

**दशान्तर्दशायां जातक: राजयोग: गृह्नाति।**

**आचार्यभट्टोत्पलेन टीकायां प्रतिपादितमस्ति।** यथा–

**लग्नात् कर्मगो वा स्यादथवा प्रबलोऽपि य:।**

**स स्यात्स्वान्तर्दशाकाले राज्यपद: प्रबलो यदा।।**

**नीचारिगृहस्थस्य दशायां प्रबलस्य च।**

**च्युतिर्बलविहीनस्य तन्मोक्ष: परसंश्रयात्।।**[6]

राजयोगनिर्माणकाले सर्वप्रथमं यद् विचार्यते तत् राजयोगोतपादकग्रहनिर्माणमेव। तत्र क: ग्रह:, येन प्रभावेन जातक: अयं योग: प्राप्नोति। अत्र लग्नेश: कर्मेश:, भाग्येश: कोऽपि बलवान्कारकग्रह: वा स्यात् येन सर्वाधिकं प्रभावं फलं वा दीयते। तस्य ग्रहदशायां जातक: राजयोगं प्राप्नोति। तस्याभावे सति लग्ना–दशमयो: स्थितिवशात् तदधिपतिवशात् चायं योग: परिकल्प्यते।

एवमेवास्य योगस्योपरि रविचन्द्रयो: प्रभावमपि विशेषेण महत्त्वकारक भवति। तत्र अनयोर्मध्ये य: बलवान् तद्दशायां जातक: राजयोगं प्राप्नोति।

पूर्वोक्तश्लोकवशात् च न केवलं राजयोगा: एव प्राप्यन्ते अपितु शत्रु–नीचग्रहाणां दशायां मानहानि: नाश: च प्राप्यते। यथोक्तं सारावल्यां–

**बलरहितेन्दुरविभ्यां युक्तैमादिभिर्ग्रहैर्मिश्रा:।**

**न भवन्ति महीपाला दशासु तेषां सुतार्थयुता:।।**[7]

साहसिककार्य: प्रतापी व्यक्तिद्वारा विद्यते। जातकतत्वे प्रतापीयोगस्य लक्षणम् अनेन प्रकारेण विद्यते–

**रत्मारीशावन्येण्न्यस्थानगौ वा केन्द्रगौ प्रतापी।**

**षष्ठ: गुरौ लाभे चन्द्रे प्रतापी।**

**लाभये शुभभांशे प्रतापी।**[8]

अर्थात् षष्ठाष्टम एवञ्च अष्टम भावाधिपतीनां परस्परं एक-द्वितीयस्य गृहे भवति अथवा द्वौ केन्द्रस्थौ भवतः तदा जातकः प्रतापी भवति। षष्ठभावे वृहस्पतिः एवञ्च एकादशे भावे चन्द्रः स्थिते सति जातकः प्रतापीभवति एवञ्च साहसिकं कार्यं करोति। तथा एकादशेशः शुभग्रहस्य नवांशे स्थिते सति जातकः प्रतापी भवति। साहसिककार्यस्य विश्लेषणे न मया निष्कर्षरूपेण प्राप्यते यत् - जगति समेषामपि सत्वानां नैसर्गिकीयमभिवाञ्च यत् स्याद् दुःखास्यात्ययः सुखाधिगमश्च। का नु वरीयसी श्रुतिहरि स्वीकार्या सामयमेतत् सामयितुम्।

स्वान्तेन चिन्तयते चेत्तर्हि पुरुषार्थमन्तरा न समानान्तरं दृष्टिपथमुपयाति। मीरा वा, वीरा वा, मनीषिणो वा, वाग्वैभवसम्पन्ना वाग्मिनो वा, कविताकमिनीकान्ताः कविवरा वा, सर्वेऽपि पौरुषधारित्यैवाभीष्टां सिद्धिंजग्मुः। अकर्मणताद्विलस्यं पौरुषहीनत्वं दैष्टिकता वाऽत्र प्रत्यवायरूपेणावतिष्ठते। यद्यपि हार्दिकी सुखालिप्सा, अभीष्टमात्महितं, समीहितं परहितं, काक्षतं कुलहितं, वाञ्छितं विश्वहितं, समीहितं सजाजसुख वा तर्हि आलस्य नाम रिपुरपनेयश्चेत्, रिपुरपनेयश्चेत्सोदपहरणीयाण्कर्मपयताण्पहस्तयितव्यं चापौरुषत्वम्। साहसिककार्यमपि उद्यमेन सिध्यति। यथा चोक्तम्-

**उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः।**

**षडेते यत्र तिष्ठन्ति तत्र देवः सहायकाः।**

अतः सामूच्यते-पूर्वजन्मछतं कर्मतदैवमिति कथ्यते। दिष्टिरेव सामाकत्वेन बामाकत्वेन वोपतिष्ठते निगखलेषु दिव्यमाणेषु कर्मसु। अतः साहसिककार्यमपि सिद्धिरसिर्वा दैवामीनेति वाग्रहामानेति वर्तते। अत्र दैष्टिका उदाहरन्ति-

**सूर्यचन्द्रमसौ तेजसं वरिष्ठो नियत्यमानत्वदेवास्तं समुपगच्छतः।**

**विद्यां पारुषं चाननुरुमय लोको दैवानुरूपमेव फलमश्नुते।**

सुरासुरतमनुमन्थने समेऽपि भागे प्राप्त हरिर्लक्ष्मी लेभे, हरस्तु हलाहलमेव।

उक्तं च-

**दैवं फलति सर्वत्र न च विद्या न च पौरुषम्।**

**समुमथनाल्लेभे हरिलक्ष्मी हरो विषम्।।**

अतएवाह श्रीहर्षः

**अवश्यभव्येष्वनवग्रहग्रहा यया दिशा भवति मासः स्पृहा।**

**तृणेन वात्येव तयाण्नुगम्यते जनस्य चित्तेन भृशावशात्मना।**

**विरुणे हि विमौ श्रमसहप्मपि वितथं स्यात्।**

**भाग्येण्नुकूले दोषा अपि गुणत्वमायन्ति।**

**अतएवाइत्थमाह श्री कृष्णः  गीतायाम्-**

**कर्मण्येवामिकारस्ते मा फलेषु कदाचन।**

**माकर्मफलहेतुर्भूमातेसांगोफरत्वकर्मणि।।**

**सत्फलं तपसा श्रमेण सुचरितेन लभ्यम्। तदेव च परिणमति काले।**

**भाग्यानि पूर्वतपसा किल सिञ्चतानि।**

**काले फलन्ति पुरुषस्य यथैव वृक्षाः।।**

**निष्कर्षः -** भाग्याद् गुरुतरं कर्म, तदेव फलति, तदेव चोपास्यम्। साहसिकं कर्म कर्तव्यम्। कथयतु नमस्तत् कर्मभ्यो विमारपि न येभ्यः प्रभवति। अतः कर्मस्य साझे साहसिककार्याणाम् छते शुभग्रहस्य सहयोगमपि आवश्यकं विद्यते। यथा पराशरः कथयति–

**तुवाराशिं समाश्रित्य कर्मेशे गुरुसंयुते।**

**भाग्येशे कर्मराशिरथे मानैश्वर्यपतापवान्।।**

**सन्दर्भ ग्रन्थ : -**


1 बृहज्जातकम्।

2. फलदी–7/26 ।

3. जात. पारिजातस्य भावे।

4. सारावली 18/11–12 ।

5. बृहज्जातकम्–11–12 ।

6 बृहज्जातकस्य, टीकायां–11/18 ।

7. सारावली–37/28 ।

8. जातकतत्वे–10/50–52 ।